NCC-001-014208 Seat No. ________

# M. A. (Sem. II) (CBCS) Examination

**April / May – 2017**

## Sanskrit : CCT-05

*(Gadyakavya)*

*(१) बाणभट्टविरचितं हर्षचरितम् – उच्छ्वास–५*

*(२) दण्डी विरचितं दशकुमारचरितम् – उच्छ्वास–८*

*(३) बाणभट्टविरचिता कादम्बरी – (महाश्वेतावृत्तान्तः)*

*(Old Course)*

**Faculty Code : 001**

**Subject Code : 014208**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

१ નીચેનામાંથી કોઈપણ **બે** ગદ્યખંડોનો અનુવાદ કરો : १४

1 Translate any **two** of the following passages : 14

(१) लेखार्थेनैव च समं गृहीत्वा हृदयेन सन्तापमवग्रहरूपोऽभ्यधात् – 'कुरङ्गक ! किं मान्द्यं तातस्य ?' इति । स चक्षुषा बाष्पजलबिन्दुभिर्मुखेन च खज्जाक्षरैः क्षरद्भिर्युगपदाचचक्षे । 'देव ! दाहज्वरो महान्' इति । तच्चाकर्ण्य सहसा सहस्रधेवास्य हृदयं पफाल । कृताचमनश्च जनयितुरायुष्कामोऽपरिमितमणिकनकरजतजातमात्मपरिबर्हमशेषं ब्राह्मणसादकरोत् । अभुक्त एवोच्चचाल । 'दापय वाजिनः पर्याणम्' इति च पुरःस्थितं शिरःकृपाणं बिभ्राणं बभाण युवानम् । वेपमानहृदयश्च ससम्भ्रमप्रधावितपरिवर्धकोपनीतमारुह्य तुरङ्गमेकाक्येव प्रावर्तत ।

(२) वत्स ! जानामि त्वां पितृप्रियमतिमृदुहृदयम् । ईदृशेषु विधुरयति धीमतोऽपि धियम् । अतिदुर्धरो बान्धवस्नेहः सर्वप्रभाथी । यतो नार्हस्यात्मानं शुचे दातुम्। उद्दाममहादाहज्वरदग्धोऽपि दह्ये खल्वहमधिकतरमनेनायुष्मदाधिना । निशितमिव शस्त्रं तक्ष्णोति मां त्वदीयस्तनिमा । सुखं च राज्यं च वंशश्च प्राणाश्च परलोकश्च त्वयि मे स्थिताः । यथा मम तथा सर्वासां प्रजानाम् । त्वद्विधानां पीडाः पीडयन्ति सकलमेव भुवनतलम् । न ह्यल्पपुण्यभाजां वंशमलङ्कुर्वन्ति भवादृशाः । फलस्यानेकजन्मान्तरोपार्जितस्याकलुषस्य कर्मणः ।

(३) देव ! दैवानुग्रहेण यदि कश्चिदभाजनं भवति विभूतेः तमकस्माच्चावचैरुपप्रलोभनैः कदर्थयन्तः स्वार्थं साधयन्ति धूर्ताः । तथा हि । केचित्प्रेत्य किल लभ्यैरभ्युदयातिशयैराशामुत्पाद्य, मुण्डयित्वा शिरः, बद्ध्वा दर्भरज्जुभिः, अजिनेनाच्छाद्य, नवनीतेनोपलिप्य, अनशनं च शापयित्वा, सर्वस्वं स्वीकरिष्यन्ति । तेभ्योऽपि धोरतराः पाषण्डिनः पुत्रदारशरीरजीवितान्यपि मोचयन्ति । यदि कश्चित् पटुजातियो नास्यै मृगतृष्णिकायै हस्तगतं त्यक्तुमिच्छेत्, तमन्ये परिवार्याहुः– 'एकामपि काकिणीं कार्षापणलक्षमापादयेम शस्त्रादृते सर्वशत्रून् घातयेम, एकशरीरिणमपि मर्त्यं चक्रवर्तिनं विदधीमहि, यद्यस्मदुदिष्टेन मार्गेणाचर्यते' इति ।

(४) सत्यमाह चाणक्यः – 'चित्तज्ञानानुवर्तिनोऽनर्थाः अपि स्युः । दक्षिणा अपि तद्भावबहिष्कृता द्वैष्या भवेयुः' इति । तथापि का गतिः । अविनीतोऽपि न परित्याज्यः पितृपैतामहैरस्मादृशैरयमधिपतिः । अपरित्यजन्तोऽपि कमुपकारकमश्रूयमाणवाचः कुर्मः । सर्वथा नयज्ञस्य वसन्तभानोरश्मकेन्द्रस्य हस्ते राज्यमिदं पतितम् । अपि नामापदो भाविन्यः प्रकृतिस्थमेनमापादयेयुः । अनर्थेषु सुलभव्यलीकेषु क्वचिदुत्पन्नोऽपि द्वेषः सद्वृत्तमस्मै न रोचयेत् । भवतु, भविता तावदनर्थः । स्तम्भितपिशुनजिह्वो यथाकथंचिदभ्रष्टपदस्तिष्ठेयम् इति ।

२ નીચેનામાંથી કોઈપણ **બે** પૂર્વાપર સંદર્ભ સહિત સમજાવો : **१४**

**2** Explain with reference to the context any **two** of the following : **14**

(१) देव, धैर्यमवलम्बस्व । कतिपयैरेव वासरैः पुनः स्वां प्रकृतिमापन्नं स्वस्थं श्रोष्यसि पितरम् ।

(२) वीरजा वीरजाया वीरजननी च मादृशी पराक्रमक्रयक्रीता कथमन्यथा कुर्यात् ।

(३) आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा ।

(४) अविश्वास्यता हि जन्मभूमिरलक्ष्म्याः ।

૩ હર્ષચરિતના આધારે બાણની ગદ્યશૈલીનો વિસ્તૃત પરિચય આપો. **१४**

**3** Describe in detail the prose style of Bana Bhatta on the basis of हर्षचरित. **14**

**અથવા/OR**

૩ હર્ષચરિત ઉચ્છ્વાસ-૫ના આધારે હર્ષવર્ધનનું પાત્રાલેખન કરો. **१४**

**3** Sketch the character of हर्षवर्धन on the basis of हर्षचरित उच्छ्वास–५. **14**

૪ કથા અને આખ્યાયિકાનાં લક્ષણો આપી દશકુમારચરિતનો સાહિત્ય પ્રકાર જણાવો. ૧૪

**4** State the characteristics of कथा and आख्यायिका and determine the literary form of दशकुमारचरित. **14**

**અથવા/OR**

૪ દશકુમારચરિતમાં પ્રતિબિંબિત સામાજિક સ્થિતિ વર્ણવો. ૧૪

**4** Describe the social position reflected in दशकुमारचरित. **14**

૫ નીચેનામાંથી કોઈપણ **બે** પર ટૂંકનોંધ લખો : ૧૪

**5** Write short notes on any **two** of the following : **14**

(૧) અચ્છોદ સરોવરના દર્શનથી ચન્દ્રાપીડના મનોભાવો.

(1) Reflections of चन्द्रापीड at the sight of अच्छोद lake.

(૨) પુંડરીકનું પાત્ર.

(2) Character of पुण्डरीक.

(૩) વસન્તવર્ણન.

(3) The description of vernal season.

(૪) મહાશ્વેતાનું વ્યક્તિત્વ.

(4) Personality of Mahashweta.